श्रीऔर्व्व उवाच ।
"इति तस्य वचः श्रुत्वा शम्भोरमिततेजसः ।
भैरवस्तं तु पप्रच्छ वेतालोऽपि समुत्सुकः" ॥
श्रीवेतालभैरवावूचतुः ।
"श्रुतः पीठक्रमस्तात देव्याः पूजाक्रमन्ततः ।
श्रोतुमिच्छामि मूर्त्तीनां पञ्चानामपि शङ्कर ! ॥
रूपाणि पञ्चमूर्त्तीनां मन्त्राणि च समन्ततः ।
तथा यन्त्राणि तन्त्राणि वद नौ वृषभध्वज !" ॥
ईश्वर उवाच ।
"शृणु वक्ष्यामि वेताल मन्त्रं तन्त्रं पृथक् पृथक् ।
कामाख्यापञ्चमूर्त्तीनां रूपं कल्पञ्च भैरव ! ॥
कामस्थं काममध्यस्थं कामदेवपुटीकृतम् ।
कामेन कमयेत् कामी कामं कामे नियोजयेत् ॥
व्यञ्जनन्तु व्यञ्जनं ब्रह्म न परः शान्त उच्यते ।
प्रथमं क्रमतः कुर्य्यात् तत्संसक्तं सुधामयम् ॥
प्रजापतिस्तथा शक्रबीजसंस्थादिसंयुतम् ।
चन्द्रार्द्धसहितं बीजं कामाख्यायाः प्रचक्षते ॥
इदं धर्म्मप्रदं काममोक्षार्थानां प्रदायकम् ।
इदं रहस्यं परमन्यत्र तु सुदुर्लभम् ॥
श्रीबीजेदं यः शृणुयाद्रुद्रवक्त्राक्षरोत्तमः ।
स कामानखिलान् प्राप्य शिवलोके महीयते ॥*॥
"श्रुतिसकलितसारं देवकण्ठौघहारं
सकलकलुषहारि श्रीधरामर्त्त्यकारि ।
सुनयशुभयशोभिर्योजयेद्यन्तु गोभि-
स्तदिह शिवसमस्तं विप्रधर्म्माङ्कितास्तम् ॥
नयनकलितकारि ध्यानिनां दत्तपारि
प्रणयसुनयसंस्थं देवसत्यादिकस्थम् ।
परमपदविशीर्षं शुद्धदौर्भाग्यशीर्षं
शृणु शिवपदरूपं कामदेव्याः स्वरूपम् ॥
श्रवणगमनमात्राम्नायितं यस्य नाम
प्रभवति बहुभूत्यै नीतिमार्गैकधाम ।
सुरगणगणसंघा कुण्डली यस्य शक्ति-
स्तदिह परमरूपं चिन्तनीयं स्तवीशैः ॥
रविशशियुतकर्णा कुङ्कुमापीतवर्णा
मणिकनकविचित्रा लोलजिह्वा त्रिनेत्रा ।
अभयवरदहस्ता साक्षसूत्रप्रशस्ता
प्रणतसुरनरेशा सिद्धकामेश्वरी सा ॥
अरुणकमलसंस्था रक्तपद्मासनस्था
नवतरुणशरीरा मुक्तकेशी सुहारा ।
शवहृदि पृथुतुङ्गस्तन्ययुग्मा मनोज्ञा
शिशुरविसमवस्त्रा सिद्धकामेश्वरी सा ॥
विपुलविभवदात्री स्मेरवक्त्रा सुकेशी
दलितकरकदन्ता सामिचन्द्रावतंसा ।
मनसिजदृशदिस्था योनिमुद्रां लसन्ती
पवनगगनशक्ता संश्रुतस्थानभागा ॥
चिन्त्या चैवं विद्युदग्निप्रकाशा
धर्म्मार्थाद्यैः साधिता वाञ्छितार्थैः ।
कल्पं तन्त्रं शृणुष्विदं सम्यगर्थं
वेतालत्वं भैरवत्वं प्रतिष्ठम् ॥
तस्मिन्नाद्यं मण्डलं विद्धि पश्चात्
कार्य्यं तद्वै चन्दनैः पुष्पगन्धैः ।
तत्पर्य्याये लेखने पूर्व्वमुक्तो
देवीतन्त्रे सोऽत्र पूर्व्वं विधेयः" ॥
इति श्रीकालिकापुराणे ६१ अध्यायः ॥

कामाग्निसन्दीपनमोदकं, क्ली, (सन्दीप्यते अनेनेति सन्दीपनम् । कामाग्नीनां सन्दीपनमुद्दीपकम् । कामाग्निसन्दीपनश्च तत् मोदकश्चेति ।) औषध-विशेषः । यथा,—
"कर्षो रसो गन्धकमभ्रकञ्च
द्विक्षारचित्रे लवणानि पञ्च ।
शटी यमानीद्वयकीटहारि
तालीशपत्राख्यपरं द्विकर्षम् ॥
जीरं चतुर्ज्जातलवङ्गजाती-
फलञ्च कर्षत्रयमेवमन्यत् ।
सदेवदारं कटुकत्रयञ्च
तथा चतुःकर्षमितं निबोध ॥
धन्याकयष्टीमधुकं कशेरु-
कर्षाः पृथक् पञ्च वरी विदारी ।
वरेभकणोभवलात्मगुप्ता-
बीजं तथा गोक्षुरबीजयुक्तम् ॥
सर्व्वजयत्वेन्द्ररजःसमानं-
समाक्षिता चौद्रहतञ्च तुल्यम् ।
कर्षैकमिन्दीरवमोदकं तत्
कामाग्निसन्दीपनमेतदुक्तम्" ॥ * ॥
"कर्षं ततः परतरं सततं न दृष्ट-
मेनं निषेव्य मनुजः प्रमदासहस्रम् ।
गच्छन्न लिङ्गशिथिलत्वमवाप्नुयाच्च
नागाधिपं विजयते बलतः प्रमत्तः ॥
कान्त्या जितागमनमपि स्वरतो मयूरान्
वाहं ययेन नयनेन महाविहङ्गम् ।
वातानशीतिमथ पित्तगदं समग्रं
श्लेष्मोत्थविंशतिरुजः परमग्निमान्द्यम् ॥
दुर्नामकामलभगन्दरपाण्डुरोग-
मेहातिसारकृमिहृद्ग्रहणीप्रदोषान् ।
कासज्वरश्वसनपीनसपार्श्वशूल-
शूलाम्लपित्तसहितांश्चिरजान् समस्तान् ॥
हत्वा गदानपि च तत् पुनरप्यकारि
सर्व्वर्त्तुपथ्यमथ सर्व्वसुखप्रदायि ।
वृष्यं बलीपलितहारि रसायनं स्यात्
श्रीमूलदेवकथितं परमं प्रशस्तम्" ॥
इति भैषज्यरत्नावली ॥

कामाङ्कुशः, पुं, (कामे कामोद्दीपने अङ्कुश इव । नखाघातेन कामोद्दीपनादस्य तथात्वम् ।) नखः । इति त्रिकाण्डशेषः ॥ (कामस्य अङ्कुश इव ।) शिश्नः । इति जटाधरः ॥

कामाङ्गः, पुं, (कामं कामोद्दीपकं अङ्गं मुकुलं यस्य ।) आम्रवृक्षः । इति जटाधरः ॥

कामातुरः, त्रि, (कामेन आतुरः ।) कामार्त्तः । यथा ।
"अर्थोलाघवमुक्तितो निपततं कामातुरो लाञ्छनम्" ॥ इति नवरत्नमध्ये धन्वन्तरिः ॥

कामान्धः, पुं, (कामेन अन्धयति निजध्वनिजनित-मन्मथोद्दीपनेन हतज्ञानं करोतीति । काम + अन्ध + णिच् + अच् ।) कोकिलः । इति राज-निर्घण्टः ॥ (कामेन अन्धः । स्मरान्धः । कामवेगेन कर्त्तव्यताज्ञानशून्यः ।)

कामान्धा, स्त्री, (कामं यथेष्टं अन्धयति । अन्ध + णिच् + अच् + टाप् ।) कस्तूरी । इति राजनिर्घण्टः । (स्मरेण अन्धा । कर्त्तव्यज्ञानशून्या । प्रगल्भा-नायिकाविशेषः । यथा, साहित्यदर्पणे ३ । ७० ।
"स्मरान्धा गाढतारुण्या समस्तरतकोविदा ।
भावोन्नता दरव्रीडा प्रगल्भाक्रान्तनायका" ॥
अस्या उदाहरणं यथा तत्रैव ।
"धन्यासि या कथयसि प्रियसङ्गमेऽपि
विश्रब्धचाटुकशतानि रतान्तरेषु ।
नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्यः शपामि यदि किञ्चिदपि स्मरामि" ॥)

कामायुः [ स् ] पुं, (कामं यथेष्टं आयुर्यस्य ।) गरुडः । इति त्रिकाण्डशेषः ॥

कामायुधः, पुं, (कामस्य आयुधमिव मुकुले आकारो-ऽस्ति अस्य । अर्श आदित्वात् अच् ।) महा-राजचूतः । आम्रः । इति राजनिर्घण्टः ॥ काम-देवास्त्रे क्ली ॥

कामारण्यं क्ली, (कामं मनोहरं अरण्यम् ।) मनोज्ञ-वनम् । इति शब्दमाला ॥
(कामस्य अरण्यमिति विग्रहे कन्दर्पवनम् ॥)

कामारिः, पुं, (कामस्य अरिः ।) विटमाक्षिकधातुः । इति हेमचन्द्रः ॥ महादेवः कन्दर्पनाशकत्वात् ॥

कामार्त्तः, त्रि, (कामेन ऋतः ।) कामपीडितः । कामातुरः । यथा, मेघदूते ५ ।
"कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु" ॥

कामालुः, पुं, (कामं यथेष्टं अलति पुष्पविकाशेन पर्य्याप्नोतीति । अल पर्य्याप्तौ + उण् ।) रक्तका-ञ्चनवृक्षः । इति शब्दचन्द्रिका ॥

कामावसायिता, स्त्री, (कामेन स्वेच्छया अवसाययति सर्व्वाणि अविद्यावासनाजालानि । काम + अव + सो + णिच् णिनि ततो भावार्थे तल् ।) कामान् स्वेच्छया अवसाययितुं शीलमस्य कामावसायी तस्य भावः । इति सारसुन्दरी ॥ शिवस्याणिमा-द्यष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः । इत्यमरः शब्द-रत्नावली च ॥ सा तु सत्यसङ्कल्पता ॥ (अष्टैश्व-र्य्याणि यथा,
"अणिमा लघिमा व्याप्तिः प्राकाम्यं गरिमा तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता" ॥)

कामावसायित्वं, क्ली (कामावसायिनो भावः । त्व-प्रत्ययः ।) कामावसायिता । इति हेमचन्द्रः ॥

कामिः, पुं, (कामयते इति । कम् + णिच् + इन् ।) कामुकः । रत्यां स्त्री । इति मेदिनी ॥

कामिकः, पुं, (कामः अस्त्यस्य ठन् ।) कारण्डवपक्षी । इति शब्दरत्नावली ॥ (कामेन निर्वृत्तम् । ठञ् । कामनिर्वृत्तकर्म्मणि क्ली । यथा, महाभारते अनुशासनपर्व्वणि ।
"देवतास्तस्य तुष्यन्ति कामिकं तस्य सिध्यति" ॥)

कामिनी, स्त्री, (अतिशयेन कामः अस्या अस्ति इति । काम + इनिः + ङीप् ।) अतिशयकामयुक्ता नारी । इत्यमरः । २ । ६ । ३ । (यथा, मनुः ८ । ११२ ।
"कामिनीषु विवाहेषु गवाम्भक्ष्ये तथेन्धने ।